(8)

नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः
तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः॥ १४॥

व्याख्या – प्रस्तुतोऽयं श्लोकः अभिज्ञानशाकुन्तलस्य प्रथमाङ्कात् गृहीतोऽस्ति। अत्र महाकविः कालिदासः तपोवनस्य आभोगानां वास्तविकं प्रामाणिकञ्च चित्रणं विदधाति। राजा दुष्यन्तः समन्तादवलोक्य सूत! अकथितोऽपि ज्ञायत एवायमाभोगः तपोवनस्य, सूतः कथयति – कथमिव ? राजा किं न पश्यति भवान् इह हि – नीवाराः इति। तरूणां – वृक्षाणाम्, अधः – तलप्रदेशे, शुकानां – तन्नामक पक्षिणां, ये कोटरार्भकाः – तरुविवरस्थशावकाः तेषां मुखेभ्यः – चञ्चुपुटेभ्यो, भ्रष्टाः – विगलिताः, नीवाराः – तृणधान्यानि दृश्यन्ते इति। नीवाराणमन्यत्र अनाधिक्यादत्रतु बाहुल्येन प्रतीयमानत्वादयं खलु तपोवनस्याभोगः इतिभावः। क्वचित् – कस्मिन्नपि भागे, इङ्गुदीनां – तापसतरूणां फलानि भिन्दन्ति – स्नेहनिःसारणाय, विदारयन्ति – पिंषन्तीति इङ्गुदीफलभिदः, अतएव प्रस्निग्धाः – प्रकर्षेण चिक्कणाः, तैलाभ्यञ्जिताः एव, उपलाः – प्रस्तराः, सूच्यन्ते – प्रकाश्यन्ते, मुनयस्तु इंगुदीतैलेनाभ्यङ्गप्रदीपादि कर्म सम्पादयन्ति इत्यत्र च तद्‌बाहुल्य दर्शनात्तपोवनमिदमित्यनुमानम्। सूच पैशुन्ये इत्यस्मात् चौरादि-कात्कर्मणि लट्। विश्वासोपगमात् – मुनीनां वात्सल्येन विश्वासलाभात्, अत्रास्मान् न कोऽपि हिंस्यादिति बुद्ध्येति भावः। अभिन्नाः – विशेषमप्राप्ता यथापूर्वमवस्थिता गतिः – सञ्चारो येषां ते तथोक्ताः सन्तः – मृगाः – तत्रत्याः हरिणाः, शब्दं – रथोत्थध्वनिं, सहन्ते – निर्भयं – समाकर्णयन्ति, शब्दमसहमानाः न धावन्ति इति भावः। अन्यत्र मृगाणामीदृगाकारदर्शनाभावादत्र तु तद्‌बाहुल्येन दर्शनात् तपोवनमिदम् इत्यनुमानम्। तथा तोयाधारपथाः – उदजात् जलाशय गमनमार्गाः, च – सर्वसमुच्चये, वल्कलानां – परिहिततरुत्वचां, शिखाः – अग्राणि – तासां निष्यन्देन – जलधारया याः रेखास्ताभिरङ्किताः – चिह्निताः – दृश्यन्त इति शेषः। एतेन स्नानगत तापसगतिः प्रदर्शिता। तेन – चायं तपोवनाभोग इत्यनुमानम्। अत्र काव्यलिंगानुमान समुच्चय-स्वभावोक्तयोऽलंकारः। शार्दूलविक्रीडितम् वृत्तम्। तल्लक्षणं – "सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्" इति।

अनुवाद – सुग्गे के घोंसले में बैठे हुए, सुग्गे के बच्चों के मुख से गिरे हुए धान, वृक्ष के नीचे पड़े हैं। कहीं कहीं इंगुदी का फल तोड़ने से चिकने पत्थर दिखलाई दे रहे हैं, यहाँ के रहने वाले मृगों को विश्वास हो गया है कि हमें कोई नहीं मारेगा। इसलिए ये अपनी साधारण चाल चलते हुए हमारे रथ का शब्द सहन कर रहे हैं। जलस्थान को जाने वाले मार्ग भी वल्कल की छोर से गिरनेवाले पानी से चिह्नित हो रहे हैं।

Scanned by CamScanner